# Vedavyasakritam Shiva Stotram

# वेदव्यासकृतं शिवस्तोत्रम्

## Document Information

Text title : Vedavyasakritam Shiva Stotram

File name : vedavyAsakRRitaMshivastotram.itx

Category : shiva, shivapurANa, stotra, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran, Rajani Arjun Shankar

Description/comments : shivapurANa | umAsaMhitA | adhyAya 44/99-106||

Latest update : February 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 11, 2025

*sanskritdocuments.org*

# वेदव्यासकृतं शिवस्तोत्रम्

वेदव्यास उवाच ।
देवदेव महाभाग शरणागतवत्सल ।
वाङ्मनः कर्मदुष्प्राप योगिनामप्यगोचर ॥ १॥

महिमानं न ते वेदा विदामासुरुमापते ।
त्वमेव जगतः कर्ता धर्ता हर्ता तथैव च ॥ २॥

त्वमाद्यः सर्वदेवानां सच्चिदानन्द ईश्वरः ।
नामगोत्रे न वा ते स्तः सर्वज्ञोऽसि सदाशिव ॥ ३॥

त्वमेव परमं ब्रह्म मायापाशनिवर्तकः ।
गुणत्रयैर्न लिप्तस्त्वं पद्मपत्रमिवाम्भसा ॥ ४॥

न ते जन्म न वा शीलं न देशो न कुलं च ते ।
इत्थं भूतोऽपीश्वरत्वं त्रिलोक्याः काममावहेः ॥ ५॥

न च ब्रह्मा न लक्ष्मीशो न च सेन्द्रा दिवौकसः ।
न योगीन्द्रा विदुस्तत्त्वं यस्य तं त्वामुपास्महे ॥ ६॥

त्वत्तः सर्वं त्वं हि सर्वं गौरीशस्त्वं पुरान्तकः ।
त्वं बालस्त्वं युवा वृद्धस्तं त्वां हृदि युनज्म्यहम् ॥ ७॥

नमस्तस्मै महेशाय भक्तध्येयाय शम्भवे ।
पुराणपुरुषायाद्धा शङ्कराय परात्मने ॥ ८॥

इति शिवपुराणे उमासंहितायां चतुश्चत्वारिंशाध्यायान्तर्गतं
वेदव्यासकृतं शिवस्तोत्रं समाप्तम् ।

शिवपुराण । उमासंहिता । अध्याय ४४/९९-१०६ ॥

shivapurANa . umAsaMhitA . adhyAya 44/99-106..

Proofread by PSA Easwaran

*Vedavyasakritam Shiva Stotram*
pdf was typeset on February 11, 2025

Please send corrections to *sanskrit@cheerful.com*